इयम् आकाशवाणी

संस्कृतवार्ता:

दिनाङ्क : 20/09/2025 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी गुजरातस्य भावनगरे द्विशताधिक चतुःत्रिंशत्-सहस्र कोटिरूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनम्, शिलान्यासं च कृतवान्; देशस्य समृद्धेः विकासस्य च कृते आत्मनिर्भरता महत्त्वपूर्णम् इति उक्तवान्।
- केन्द्रीय रेलमन्त्री अश्विनी वैष्णवः अद्य अवदत् यत् बहु प्रतिक्षितस्य अहमदाबाद्-मुम्बई बुलेट ट्रेन इत्यस्य प्रथमः खण्डः सप्तविंशत्यधिक द्विसहस्रतम-वर्षपर्यन्तं कार्यान्वितः भविष्यति।
- मोरक्को-देशे आत्मानिर्भर-भारतेति उपक्रमस्य अन्तर्गतं प्रथमम् भारतीय-रक्षा-विनिर्माण-केन्द्रम् स्थाप्यते।
- ईरान्-देशेन उक्तं यत् तेहरानः स्वस्य परमाणु-कार्यक्रमस्य विषये किमपि अनुचितं पीडनं न स्वीकरिष्यतीति, एतादृशाः पदाक्षेपाः तनावं वर्धयितुं शक्नुवन्ति।
- बैडमिन्टन क्रीडायां भारतस्य सात्विक साईंराज रंकीरेड्डी चिरागशेट्टी इत्युभयो: पुरुष-युगलं पन्चविंशत्यधिक-द्विसहस्रतम वर्षस्य चाईना-मास्टर्स स्पर्धाया: उपान्त्यचक्रीये द्वन्द्वे मलेशिया देशस्य आरोन चिया, सोह वूई यिक इत्युभौ सम्मुखी कुरुत:।

<u>अथ वार्ताः विस्तरेण</u>

पीएम-गुजरातः

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रत्येकस्मिन् क्षेत्रे आत्मनिर्भरतायाः आह्वानम् अकरोत्, विदेशेषु भारतस्य अवलंबनम् तस्य बृहत्तमेषु शत्रुषु अन्यतमम् अस्ति इति दृढीकृतवान्। सः अवदत् यत् सप्तचत्वारिंशदधिक द्विसहस्रतम वर्षपर्यन्तं विकसितभारतस्य सङ्कल्पं साधयितुं भारतं स्वावलंबी-राष्ट्ररूपेण विश्वस्य समक्षं स्थातुं समयः इदमेव अस्ति। प्रधानमन्त्री अद्य भावनगरे 'समुद्र से समृद्धि' इति कार्यक्रमे सम्बोधयन् आसीत्। भारतं समुद्रीय-महाशक्तिः निर्मातुं स्वस्य सर्वकारस्य दूरदृष्टिं प्रकटयन् प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् सप्तचत्वारिंशदधिक द्विसहस्रतम-वर्षपर्यन्तं वैश्विक-समुद्रीय-व्यापारे देशस्य भागं त्रिगुणितं कर्तुं लक्ष्यम् अस्ति। कार्यक्रमावधौ प्रधानमन्त्रिणा द्वात्रिंशत्सहस्रकोटिरूप्यकाणां बहुविध-परियोजनानां उद्घाटनम्, शिलान्यासं च विहितम्। श्रीमोदी मुम्बई-अन्ताराष्ट्रिय-क्रूज्-टर्मिनल् इत्यस्य अपि उद्घाटनं विहितवान्, अपि च अष्टशताधिक सप्तसहस्र कोटिरूप्यकाणां अनेकासां प्रमुख-सागरीय-परियोजनानां उद्घाटनं कृतवान्। भारतस्य ऐतिहासिकस्य सागरीयशक्ति-विषये प्रवदन्, प्रधानमन्त्री अवदत् यत् एकः समयः आसीत् यदा विश्वस्य चत्वारिंशत् तः पञ्चाशत् प्रतिशतं यावत् सागरीय-व्यापाराः भारते निर्मितानां नौकायानेन क्रियते स्म।

प्रधानमन्त्रिणा समुद्रीय-क्षेत्रस्य दुर्बलतायाः कृते पूर्व-प्रशासनं आरोपितं, उक्तं च यत् अनुज्ञापत्र-प्राप्त-राज-व्यवस्थया, वैश्वीकरणोत्तर-नीतिभिः च वैदेशीय-राष्ट्राणाम् उपरि अवलंबनम् वर्धितम्। सः अघोषयत् यत् इदं क्षेत्रं शीघ्रमेव "एकराष्ट्रं, एकपत्तन प्रक्रियां" अङ्गीकरिष्यतीति, यस्य उद्देश्यं सम्पूर्णे देशे पत्तन-प्रक्रियां सरलीकरणं अस्ति।

विरामः

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः www.newsonair.gov.in वेबसाइट इत्यत्र, अथ newsonair मोबाइल ऐप इत्यत्र अपि उपलब्धो भविष्यति।

## मुम्बई-बुलेट ट्रेनः

केन्द्रीय-रेलमन्त्री अश्विनी-वैष्णवः अद्य अवदत् यत् बहु-प्रतिक्षितस्य अहमदाबाद्-मुम्बई बुलेट-ट्रेन इत्यस्य प्रथमः खण्डः सप्तविंशत्यधिक द्विसहस्रतम-वर्षपर्यन्तं कार्यान्वितः भविष्यति। नवी-मुम्बई-नगरे घनसोली-शिलफाटा-सुरङ्गयोः सफलतायाः अनन्तरं मन्त्री वार्तावाहिन्यैः सह वार्तालापं कुर्वन् आसीत्। श्री-वैष्णवः अहमदाबाद्-मुम्बई-बुलॆट्-रेल्-परियोजनायां न्यू-आस्ट्रियन्-टनलिङ्ग्-पद्धत्याः सफलतायाः प्रशंसाम् अकरोत्, यतः एषा अष्ट-दशमलवोत्तर चत्वारि कि. मी. परिमितः सुरङ्गमार्गः बी. के. सी. शिलफाटा इत्येतयोः मध्ये एकविंशतिः कि. मी. यावत् समुद्रान्तर्गतस्य सुरङ्गस्य भागः अस्ति, यस्मिन् ठाणे-क्रीक् इत्येतयोः अधः सप्त कि. मी. यावत् विस्तारः अन्तर्भवति। सः सूचितवान् यत् अस्याः परियोजनायाः विंशत्यधिक त्रिशतं कि. मी. यावत् मार्गः पूर्णः अभवत्।

## ईरान-न्यूक्लियरः

ईरान्-देशस्य विदेशमन्त्री सैयद्-अब्बास्-अराघची इत्येषः उक्तवान् यत् तेहरानः स्वस्य परमाणु-कार्यक्रमस्य विषये किमपि अनुचितं पीडनं न स्वीकरिष्यतीति, एतादृशाः पदाक्षेपाः तनावं वर्धयितुं शक्नुवन्ति इति प्रोक्तवान्। अन्ताराष्ट्रिय-परमाणु-ऊर्जा-संस्थायाः (आई. ए. ई. ए.) इत्यस्य प्रमुखेन राफेल् ग्रौसी इत्यनेन सह दूरवाण्या वार्तालापे अराघची इत्यनेन एषा टिप्पणी कृता।

## राजनाथः मोरोक्को

रक्षामंत्री राजनाथसिंहः सोमवासरात् मोरोक्को-देशस्य द्विदिवसीय आधिकारिक यात्रायां भविष्यति। एतत् कस्यापि रक्षामन्त्रिणः उत्तर-आफ्रिका-देशस्य प्रथमा यात्रा भविष्यति, येन भारत-मोरक्को-देशयोः मध्ये वर्धमानस्य सामरिक-अभिसरणस्य विषये अवधानं प्रदीयते। भ्रमणकाले मन्त्री बेरेचिड्-नगरे टाटा-एड्वान्स्ड्-सिस्टम्स्-मोरोक्को इत्यस्य वील्ड्-आर्मर्ड्-प्लेट्फ़ार्म् इत्यस्य नूतननिर्माण-सौकर्यस्य उद्घाटने भागं ग्रहीष्यति। एतत् सौविध्यं आफ्रिकादेशस्य प्रथमं भारतीय-रक्षा-निर्माण-केन्द्रं अस्ति, यः आत्मनिर्भर-भारत्-उपक्रमस्य अन्तर्गतं भारतस्य रक्षा-उद्योगस्य वर्धमान-वैश्विक-पदाक्षेपं प्रतिबिम्बयति। श्रीसिंहः मोरक्को-देशस्य समकक्षीयेन अब्देलतीफ् लौडियाई इत्यनेन सह द्वैपाक्षिकं मेलनं करिष्यति, येन रक्षा-सामरिक-उद्योग-सहकारः सुदृढः भवेत्। उभौ पक्षौ रक्षाक्षेत्रे सहकारविषये सहमति-पत्रे अपि हस्ताक्षरे करिष्यतः इति अपेक्षा अस्ति।

<u>मुरुगन्-बुक्-लाञ्च्-</u>

सूचना-प्रसारण-राज्यमन्त्री एल्. मुरुगनः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे पञ्चविंशति कोटिजनाः दारिद्र्यात् बहिः आगताः सन्ति। अद्य नवदिल्ल्यां मोदीनोमिक्स्-ए जर्नी आफ् इन्क्लूसिव् ग्रोथ् इति पुस्तकस्य विमोचनानन्तरं मन्त्री अवदत् यत् अस्मिन् पुस्तके प्रधानमन्त्रिणः नरेन्द्रमोदिनः पञ्चविंशति वर्षाणि यावत् सार्वजनिकसेवाः, गुजरातस्य मुख्यमन्त्रीतः भारतस्य प्रधानमन्त्रीपर्यन्तं, तस्य परिवर्तनशीलयात्रा च चित्रितम् अस्ति। प्रधानमन्त्री-जन-धन-योजना, प्रधानमन्त्री-सुरक्षा-बीमा-योजना इत्यादीनां योजनानां उल्लेखं कुर्वन् श्रीमुरुगनः अवदत् यत् एताः योजनाः जनानां कल्याणाय कार्यान्विताः सन्ति। अस्मिन् कार्यक्रमे भाषमाणः, सूचना-प्रसारण-मन्त्रालयस्य सचिवः सञ्जय् जाजुः, उक्तवान् यत् सर्वकारेण कार्यान्वितानां योजनानां सकारात्मकप्रभावं प्रकाशयितुं शोधस्य आवश्यकतायाः विषये अवधानं प्रदत्तम्।

## बैडमिन्टन

बैडमिन्टन क्रीडायां भारतस्य सात्विक साईंराज रंकीरेड्डी चिरागशेट्टी इत्युभयो: पुरुष-युगलं स्वकीयेन उत्तम प्रदर्शनेन पन्चविंशत्यधिक-द्विसहस्रतम वर्षस्य चाईना-मास्टर्स स्पर्धाया: उपान्त्यचक्रीय द्वन्द्वे मलेशिया देशस्य आरोन चिया, सोह वूई यिक इत्युभौ सम्मुखी कुरुत:।

। इति वार्ता: ।।